# A-II/1/1395/22

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तत्त्वसंग्रहकारः कः?
2. तत्त्वसंग्रहशब्दार्थपरीक्षायां कति कारिकाः सन्ति?
3. आचार्यकमलशीलः केन दर्शनसम्प्रदायेन सम्बद्धः?
4. क्षणभङ्गवादिनः के?
5. तत्त्वसंग्रहग्रन्थे कति परिच्छेदाः परीक्षाः वा सन्ति?
6. केन महाविहारेण सम्बद्ध आसीत् आचार्यशान्तरक्षितः?
7. सत्यं कतिविधम्? नामानि लिखत।
8. अन्यापोहः कः?

**अथवा**

सौगतनैयायिकाः शब्दप्रामाण्यं स्वीकुर्वन्ति न वा?

9. भोटदेशेभिक्षुसङ्घस्य महाविहारस्य च सर्वप्रथमं स्थापनं केनाचार्येण कृतमासीत्?
10. अतद्व्यावृतरूपः कः? पाठ्यग्रन्थदिशा सूचयत।

**अथवा**

पर्युदासाः कतिविधाः? के च ते?

11. आचार्यशान्तरक्षितः कस्य बौद्धसम्प्रदायस्य प्रस्थापकः?
12. स्वलक्षणं कस्य विषयः?
13. 'विधिरेव शाब्दार्थः' इति केषां मतम्?

**अथवा**

सामान्यलक्षणं कस्य विषयः?

14. 'यतः स्वलक्षणं जाति' इत्यत्र 'जातिः' इत्यस्य पदस्य कोऽर्थः?

**अथवा**

प्रमाणसमुच्चयकारः कः?

15. 'शब्दो ह्याकाशगुणः' इति के स्वीकुर्वन्ति? बौद्धनैयायिकाः वैशेषिकाः वा?

**अथवा**

रूपं सप्रतिघम् अप्रतिघं वा?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. तत्त्वसंग्रहशब्दपरीक्षातः एकां कारिकां स्वस्मृत्या (या प्रश्नपत्रेनागता स्यात्) उद्धृत्य तस्याः विवृतिं सम्यगुपस्थापयत।

17. हिमाचलादयो येऽपि देशकालाद्यभेदिनः। इष्टास्ते त्वणुशो भिन्नाः क्षणिकाश्च प्रसाधिताः॥

–ग्रन्थोक्तदिशा कारिकेयं स्वमत्या व्याख्यात।

**अथवा**

तत्त्वसंग्रहग्रन्थस्य विषयवस्तु किं विवृणुत।

18. अतत्कारणभेदेन क्वचिच्छब्दो निवेश्यते। प्रयत्नोत्थो यथा शब्दो भ्रामरं वा यथा मधु॥

–अस्याः कारिकायाः ससन्दर्भं व्याख्या विधेया।

**अथवा**

अपोहवादः अधीतग्रन्थनयेन विवेचनीयः।

19. यस्य यस्य हि शब्दस्य यो यो विषय उच्यते। स स सङ्घटते नैव वस्तूनां सा हि धर्मता॥

–ग्रन्थोक्तदिशा कारिकेयं सम्यक्तया व्याख्यातव्या।

**अथवा**

तत्त्वसंग्रहग्रन्थस्य पञ्जिकायाः वैशिष्ट्यं लेखनीयम्।

20. तद्व्यक्त्याकृतिजातीनां पदार्थत्वं यदुच्यते। तदसम्भवि सर्वा सामपि नीरूपता यतः॥

–ग्रन्थोक्तदिशा कारिकेयं सम्यक्तया व्याख्यातव्या।

**स. कश्चन एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. आचार्यशान्तिरक्षितस्य व्यक्तित्वं कृतित्वञ्च विलिख्य बौद्धदर्शनक्षेत्रे तस्यावदानं प्रतिपाद्यताम्।

**अथवा**

शब्दार्थपरीक्षायाः पाठ्यांशस्य सारः प्रतिपादनीयः।

**अथवा**

शब्दार्थसम्बन्धस्य बौद्धदिशा खण्डनं कुरुत।

# A-II/2/1396/22

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रमाणसमुच्चयकारः कः? अनेन ग्रन्थेन सह प्रमाणवार्तिकस्य कीदृशः सम्बन्धः? निरूपयत।
2. स्वलक्षणं किम्?
3. प्रमाणवार्तिकस्य कस्यचनटीकाकारस्य टीकापूर्वकं नामोल्लेखं कुरुत।
4. प्रमाणस्य अधीतग्रन्थदिशा लक्षणं लिखत।
5. आचार्यधर्मकीर्तेः ग्रन्थत्रयस्य नामानि लिखत।
6. वार्तिकालंकारभाष्यं केन लिखितम्?

**अथवा**

आर्यसत्यनामानि लिखत। सत्यद्वयोर्मध्ये विभाजनं कुरुत।

7. नैरात्म्यं कतिविधम्? नामानि लिखत।
8. कति प्रमाणानि? कानि च तानि?
9. अविद्या का?

**अथवा**

प्रमेयं कतिविधम्? बौद्धदिशा लिखत।

10. पञ्चोपादानस्कन्धाः के?

**अथवा**

परमार्थसत्यं लेखनीयम्।

11. सौगतमते ईश्वरसिद्धिः जायते न वा? पाठ्यग्रन्थदिशा लिखत।
12. सामान्यलक्षणं किम्?

**अथवा**

शास्ता कस्य संज्ञा? कथम्? सूचयत।

13. प्रमाणवार्तिके कति परिच्छेदाः नामानि लिखत।
14. 'विधूत कल्पनाजालम्' इत्यस्य किं तात्पर्यम्?

**अथवा**

प्रमाणवार्तिकं कस्य बौद्धसम्प्रदायस्य ग्रन्थः?

15. पाठ्यग्रन्थस्य मङ्गलपद्यं लिखत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थात् कारिकामेकां विलिख्य तस्याः विवृतिं कुरुत, या प्रश्नपत्रेऽत्र नागता स्यात्।
17. सम्यक्तया प्रसङ्गपूर्वकं विवेचयत –

वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते। प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम्॥

**अथवा**

अमृतेः कस्यचित् तेन ह्यनुभूतेः स्मृतोद्भवः। स्थिरं सुखं ममाहं चेत्यादि सत्यचतुष्टये॥

18. गृहीतग्रहणान्नेष्टं सांवृतं धीप्रमाणता।

प्रवृत्तेस्तत्प्रधानत्वात् हेयोपादेयवस्तुनि॥ –अस्याः कारिकायाः सन्दर्भसहिता व्याख्या विधेया।

19. सप्रसङ्गं व्याख्येयम् –

तद्वत् प्रमाणं भगवान् अभूतविनिवृत्तये। भूतोक्तिः साधनापेक्षा ततो युक्ता प्रमाणता॥

**अथवा**

प्रतिक्षणविनाशे हि भावानां भावसन्ततेः। तथोत्पत्तेः सहेतुत्वादाश्रयोऽयुक्तमन्यथा॥

20. यथामत्या विवेचयत –

हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः। यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः॥

**अथवा**

प्रामाण्यं व्यवहारेण शास्त्रं मोहनिवर्तनम्। अज्ञातार्थप्रकाशो वा स्वरूपाधिगतेः परम्॥

**स. कश्चन् एकः निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. भारतीयन्यायक्षेत्रे प्रमाणवार्तिकस्य अवदानमभिलक्ष्य निबन्धमेकं विशदीकुरुत।

**अथवा**

आचार्यधर्मकीर्तेः व्यक्तित्वं कृतित्वमधिकृत्य निबन्धमेकं लिखत।

**अथवा**

विविधेषु प्रमाणेषु बौद्धसम्मतप्रमाणसिद्धिपूर्वकं निबन्धमेकं लेखनीयम्।

# A-II/3/1397/22

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. रूपादिस्कन्धपञ्चकं लिखत।
2. माध्यमिककारिकाकारस्य नाम सहितं तद्ग्रन्थस्य परिच्छेदसंख्या लेखनीया।
3. प्रसन्नपदाख्यवृत्तिकारः कः?
4. माध्यमिककारिकायाः द्वितीयप्रकरणस्य नाम किम्?
5. कस्मात् भावाः द्वाभ्यां नोत्पद्यन्ते?

**अथवा**

माध्यमिकानां कति भेदाः? नामानि लिखत।

6. आत्मपरीक्षायाम् 'आत्मा' पदार्थस्य सिद्धिः क्रियते असिद्धिः वा? नागार्जुनदिशा सूचयत।
7. 'प्रपञ्चस्तु शून्यतायां निरुध्यते' इत्यस्य कः आशयः?

**अथवा**

प्रतीत्यसमुत्पादस्य अपरनाम किम्?

8. नैरात्म्यज्ञानं किम्? कतिविधम्?
9. माध्यमिककारिकायाः अष्टादशप्रकरणस्य नाम किम्? कति च तत्र कारिकाः?

**अथवा**

गतागतपरीक्षायां गमनक्रियायाः सिद्धिः माध्यमिकदिशा संभवति न वा?

10. प्रतीत्यसमुत्पादस्य प्रतिलोमक्रमः कः? यथाक्रमं लिखत।
11. कति बौद्धदार्शनिकप्रस्थानानि? नामानि लिखत।

**अथवा**

अहेतुतः कस्मात् भावाः न उत्पद्यन्ते?

12. कति प्रत्यया:? के च ते? अधीतग्रन्थदिशा सूचयत।
13. सौगता: कर्मफलं स्वीकुर्वन्ति न वा?
14. पाठ्यग्रन्थस्य प्रथमपरीक्षाया: नाम कारिकासंख्याश्च लिखत।
15. आवरणद्वयं किम्?

**अथवा**

माध्यमिकानां ग्रन्थद्वयस्य ग्रन्थकारस्य नामसहितम् उल्लेखयत।

**ब. सर्वे प्रश्ना: समाधेया:।** **(5×6=30)**

16. पाठ्यग्रन्थात् कारिकामेकां विलिख्य (या प्रश्नपत्रे नागता स्यात्) तस्या: विवृतिं कुरुत।
17. प्रसङ्गपूर्वकं व्याख्यात –

    निर्ममो निरहंकारो यश्च सोऽपि न विद्यते। निर्ममं निरहंकारं य: पश्यति न पश्यति॥

    **अथवा**

    निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे। अनुत्पन्नानिरुद्धा हि निर्वाणमिव धर्मता॥
18. सप्रसङ्गं व्याख्यात–

    सद्भूतो गमनं गन्ता त्रिप्रकारं न गच्छति। नासद्भूतोऽपि गमनं त्रिप्रकारं स गच्छति॥

    **अथवा**

    गन्ता न गच्छति तावदगन्ता नैव गच्छति। अन्यो गन्तुर्गन्तुश्च कस्तृतीयो हि गच्छति॥
19. नैरात्म्यवाद: माध्यमिकनयनानुसारं विवेचनीय:।
20. यथामत्या विवेचयत –

    अनालम्बन एवायं सन् धर्म उपदिश्यते। अथानालम्बने धर्मे कुत आलम्बनं पुन:॥

    **अथवा**

    चत्वार: प्रत्यया हेतुश्चालम्बनमनन्तरम्। तथैवाधिपतेयं च प्रत्ययो नास्ति पञ्चम:॥

**स. कश्चन् एक: प्रश्न: समाधेय:।** **(1×20=20)**

21. बौद्धदर्शनस्येतिहासे आचार्यनागार्जुनस्य योगदानमभिलक्ष्य निबन्धमेकं लिखत।

    **अथवा**

    माध्यमिककारिकाया: द्वितीयपरीक्षाया: विषयवस्तु किम्? विवृणुत।

    **अथवा**

    अधीतग्रन्थस्य प्रत्ययपरीक्षाया: सारमभिलक्ष्य निबन्धमेकं लिखत।

# A-II/4/1398/22

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. बोधिचर्यावतारस्य मङ्गलाचरणं लिखत।
2. 'बोधिचित्तानुशंसा' इत्यस्य कोऽर्थः?
3. बोधिचर्यावतारकारस्य अपरे ग्रन्थाः के? नामानि लिखत।
4. पारमिताः कति?कानि च नामानि?

**अथवा**

'सुगतात्मजसंवरावतारं' इत्यत्र 'सुगतात्मज' पदस्य कोऽर्थः?

5. 'क्षणसम्पदियं सुदुर्लभा' इत्यस्य आशयं लिखत।
6. पुरुषार्थः कः? ग्रन्थदिशा लिखत।
7. 'बलं तु पापस्य महत् सुघोरम्' इत्यत्र सुघोरं किम्?

**अथवा**

सत्त्वव्यसनानि हर्तुकामैः किं करणीयम्? ग्रन्थदिशा लिखत।

8. 'जिनरत्नप्रतिमां करोत्यनर्घाम्' इत्यत्र जिनरत्नानि कानि? नामानि लिखत।
9. सुपरीक्षितमप्रमेयधीभिर्बहुमूल्यरत्नं किम्? ग्रन्थदिशा लिखत।

**अथवा**

बोधिचित्तं कति विधम्? नामानि लिखत।

10. बोधिप्रस्थानचित्तं किम्? ग्रन्थदिशा सूचयत।
11. गन्तुकामश्च गन्तुश्च इत्यत्र केन सह सादृश्यं भजते आचार्यः?
12. बोधिसत्त्वः कस्य संज्ञा? पाठ्यग्रन्थदिशा लिखत।
13. बोधिचर्यावतार पदस्य कः अर्थः?

**अथवा**

'पापानि यन्निर्दहति क्षणेन' इत्यत्र कः क्षणेनपापान् दग्धुं क्षमः? पाठ्यग्रन्थदिशा सूचयत।

14. मैत्रेयनाथः कः? बौद्धनये तस्य किं महत्त्वम्? लिखत।

**अथवा**

'सुबाहुपरिपृच्छासूत्रे' कस्य वर्णनमुपलभ्यते?

15. मैत्रेयनाथेन सुधनाय कस्य अनुशंसनं कृतमासीत्? बोधिचर्यावतारदिशा लिखत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. बोधिचर्यावतारस्य श्लोकमेकं विलिख्य तस्य विवृतिं कुरुत। यो हि पत्रेऽस्मिन् नागता स्यात्।

17. सप्रसङ्गं व्याख्येयम् –

क्षणसम्पदियं सुदुर्लभा प्रतिलब्धा पुरुषार्थसाधनी।
यदि नात्र विचिन्त्यते हितं पुनरप्येष समागमः कुतः॥

**अथवा**

कृते यः प्रतिकुर्वीत सोऽपि तावत्प्रशस्यते। अव्यापारितसाधुस्तु बोधिसत्त्वः किमुच्यताम्॥

18. प्रसङ्गपूर्वकं व्याख्यात –

भवदुःखशतानि तर्तुकामैरपिसत्त्वव्यसनानि हर्तुकामैः।
बहुसौख्यशतानि भोक्तुकामैर्न विमोच्यं हि सदैव बोधिचत्तम्॥

**अथवा**

कस्य मातुः पितुर्वापि हितांशसेयमीदृशी। देवतानामृषीणां वा ब्रह्मणां वा भविष्यति॥

19. ससन्दर्भं व्याख्यायत –

तद्बोधिचित्तं द्विविधं विज्ञातव्यं समासतः। बोधिप्रणिधिचित्तं च बोधिप्रस्थानमेव च॥

**अथवा**

शिरःशूलानि सत्त्वानां नाशयामीति चिन्तयन्। अप्रेमयगुणं सत्त्वमेकैकं च चिकीर्षतः॥

20. सप्रसङ्गं व्याख्येयम् –

गन्तुकामस्य गन्तुश्च यथा भेदः प्रतीयते। तथा भेदोऽनयोर्ज्ञेयो यथसंख्येन पण्डितैः॥

**स. प्रश्नः समाधेयः।** **(1×20=20)**

21. बोधिचित्तस्य महात्म्यम् उपवर्णयता निबन्धमेकम् उपनिबद्धीकुरुत।

**अथवा**

बोधिचर्यावतारस्य वैशिष्ट्यमभिलक्ष्य एकं निबन्धं लिखत।

**अथवा**

आचार्यशान्तिदेवस्य व्यक्तित्वमभिलक्ष्य निबन्धमेकं विशदीकुरुत।

# A-II/5/1399/22

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. अभिधर्मकोशे कति कोशस्थानानि सन्ति? प्रथमकोशस्थानस्य किं नाम?
2. प्रथमा संगीतिः कुत्र जाता आसीत् तत्र किं जातम्?
3. सुत्तपिटके खुद्दकनिकाये कति ग्रन्थाः निहिताः? ग्रन्थत्रयस्य नामोल्लेखं कुरुत।
4. 'स्वलक्षणम्' इति कस्य प्रमाणस्य विषयः?
5. वैभाषिकदर्शनस्य कमप्येकस्य ग्रन्थस्योल्लेखं कुरुत।
6. योगाचारसम्प्रदायस्य ग्रन्थस्य एकस्य ग्रन्थकारस्य च नामोल्लेखं कुरुत।
7. माध्यमिकानां ग्रन्थद्वयस्य ग्रन्थकारनामसहितम् उल्लेखं कुरुत।
8. कति आयतनानि? नामानि लिखत।

**अथवा**

सामान्यलक्षणं कस्य प्रमाणस्य विषयः?

9. चतुर्थ संगीतिः कुत्र सम्पन्ना जाता आसीत्? तत्र किं जातम्?
10. अश्वघोषविरचितं महाकाव्यद्वयं किम्?
11. बौद्धन्यायस्य प्रथमः ग्रन्थः कः? कश्च ग्रन्थकारः? लिखत।
12. पारमिताः कति? नामानि लिखत।

**अथवा**

कति स्कन्धाः? के च ते? लिखत।

13. आवरणं कतिविधम्? के च ते?

**अथवा**

सुगतस्य अपरपर्यायाः के? नामानि लिखत।

14. सौत्रान्तिकदर्शनस्य आचार्येषु द्वयोः नामोल्लेखं कुरुत।

**अथवा**

योगाचारदर्शनस्य प्रवर्तकः कः? किञ्चास्य वादस्य अपरं नाम?

15. माध्यमिकानां कति भेदाः? नामानि लिखत।

**अथवा**

तत्त्वसंग्रहः कस्य सम्प्रदायस्य ग्रन्थः? सूचयत

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. बौद्धन्यायस्य वैशिष्ट्यं लेखनीयम्।

**अथवा**

अश्वघोषस्य काव्यग्रन्थानां नामोल्लेखपूर्वकं कमप्येकस्य परिचयो देयः।

17. प्रतीत्यसमुत्पादस्य अंगानि कति? नामानि लिखत।

18. बौद्धकर्मफलवादः विवेचनीयः।

**अथवा**

वैपुल्यसूत्रे कति ग्रन्थाः सन्ति? नामानि लिखत।

19. आचार्यशान्तिदेवस्य व्यक्तित्वं कृतित्वञ्च लिखत।

20. बुद्धयानं कतिविधम्? श्रावकयानस्य वैशिष्ट्यं लिखत।

**अथवा**

तंत्रयानं किम्? सम्यक्तया प्रतिपादनीयः।

**स. कश्चन् एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. त्रिपिटकस्य परिचयो देयः।

**अथवा**

महायानस्य वैशिष्ट्यम् अभिलक्ष्य निबन्धमेकं लिखत।

**अथवा**

बौद्धसंस्कृतसाहित्यस्य परिचयो देयः।